# उत्तर मध्यमा द्वितीय खंड वार्षिक परीक्षा 2025 - 26
## विषय कोड 1204
## संस्कृतसाहित्यम् - आदर्श उत्तरमाला

प्रश्न.1 -
(क) विजया
(ख) उपमा
(ग) वीणा
(घ) वीणया
(ङ) त्र्यम्बकः
(च) त्रयः

प्रश्न. 2 -
(क) वासवदत्ता
(ख) दुःखम्
(ग) पद्मावती
(घ) संकल्पाद्
(ङ) सञ्जीवनी
(च) उदयनः

प्रश्न. 3 -

| | | |
|---|---|---|
| नैषधीयचरितम् | - | श्रीहर्षः |
| हर्षचरितम् | - | बाणभट्टः |
| मरीचिमाली | - | सूर्यः |
| काव्यादर्शः | - | दण्डी |
| अर्थगौरवम् | - | भारविः |
| हैरम्बम् | - | वैनायकम् |

प्रश्न. 4 -
(क) आम्
(ख) आम्
(ग) आम्
(घ) न
(ङ) न
(च) न
(छ) आम्

प्रश्न. 5 -
(क) उत्तररामचरितनाटकस्य सप्तमाङ्के
(ख) दुर्वासा ऋषिः
(ग) यक्षः

(घ) द्वे महाकाव्ये रघुवंशम् , कुमारसंभवम्
(ङ) द्वन्द्व समासः
(च) अष्टादश
(छ) महाकविः भासः

अति लघूत्तरीय प्रश्नोत्तर

प्रश्न. 6 - वने चरतीति, - उपपद समासः
प्रश्न. 7 - कालदण्डः - कृतान्तः।
प्रश्न. 8 - वीर रसः।
प्रश्न. 9 - सूर्यः वत्सरं द्वादशसु भागेषु विभनक्ति।
प्रश्न. 10 - निबन्धे वाक्यरचना सर्वदा माधुर्ययुक्ता विशदर्था च स्यात्।
प्रश्न. 11 - विदूषकः मैत्रेयः चारुदत्तस्य सखा अस्ति।
प्रश्न. 12 - 604 खीष्टाब्दात् 647 खीष्टाब्दं यावत् मन्यते।
प्रश्न. 13 - तपोवने विश्रब्धं हरिणाः चरन्ति।
प्रश्न. 14 - मालायाम् अविधवाकरणं तथा सपत्नीमर्दनं नाम औषधं गुम्फनीयम्।
प्रश्न. 15 - विदूषकः वसन्तकः कथयति।

लघूत्तरीय प्रश्नोत्तर

प्रश्न. 16 - भारवेरर्थगौरवं प्रसिद्धम् । अत एव मल्लिनाथोऽपि टीकायाः प्रारम्भे - नारिकेलफलसम्मितं वचो भारवेरित्याह । बहोरप्यर्थराशेरल्पेन शब्देनाभिधाने भारविरभ्यस्तकौशल इति सर्वेषां विदुषां विचारः । 'हितं मनोहारि च दुर्लभं वचः', 'सहसा विदधीत न क्रियाम्' इत्यादयः तस्य प्रयोगाः एतमभिप्रायं समर्थयन्ति । 'भारवेः अर्थगर्गौरवम्' इत्युक्तिरपि विमर्शकलोके प्रसिद्धा।

अथवा

यत् हितकारि मनोहारि च स्यात् तादृशमुभयगुणयुक्तं वचनं दुर्लभं भवतीति उक्तेराशयः । वस्तुतः यद्वचनं हितं करोति, तत् सर्वदा मनः न हरति । यत् खलु मनः हरति, तद्वचनं खलु सर्वदा श्रोतुः हितं न करोति । यत् खलु हितं करोति, तत् सत्यं वचनं कटु भवतीति अनुभववशात् वयं जानीम एव ॥

प्रश्न. 17-
रघुवंशस्य मङ्गलाचरणम् -
वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥1॥

अथवा

नान्दी-
आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥
माङ्गल्यशङ्खचक्राब्जकोशकैरवशंसिनी।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥

प्रश्न. 18 - दशकुमारचरितेऽस्मिन् कथाः अपि दश एव सन्ति । प्रथमा सोमदत्तस्य कथा। द्वितीया पुष्पोद्भवस्य कथा। तृतीया राजवाहनस्य पराक्रमस्य कथा। चतुर्थी प्रहारवर्मणः पुत्रस्य अपहारवर्मणः कथा। पञ्चमी अपहारवर्मणः भ्रातुः उपहारवर्मणः कथा। षष्ठी अर्थपालस्य कथा। सप्तमी प्रमतेः कथा। अष्टमी मित्रस्य कथा। नवमी मन्त्रगुप्तस्य कथा। अन्ते दशमी कथा विश्रुतस्य वर्तते ॥

अथवा

बहुविधानि तपांसि भवन्ति । तेषां सर्वविधानां तपसां मूलं यदि किमपि वर्तते तत् क्षमा अस्ति । सर्वेषां तपसां क्षमामूलरूपमस्ति । नास्ति मूलम् कुतः शाखा इति न्यायेन, तपसां मूलं क्षमा एव, नास्ति चेत् अन्यानि शाखारूपाणि तपांसि कुतः भवितुमर्हतीति भावः । वस्तुतस्त्वत्र क्रोधवते दुर्वाससे ब्रह्मा क्षमायाः महत्त्वम् उपदिशति । क्षमापूर्वकं ते जीवनं भवेदिति सात्विकीमपेक्षां सेवते इतिदिक् ॥

प्रश्न.19 - जगतः भाग्यदशा चक्रदण्ड पंक्तिः इव परिवर्तमाना भवति । एकस्मिन् समये उपरि गच्छति, अग्रिमे क्षणे नीचैः गच्छति। एवमेव संसारेऽस्मिन् प्राणीनां जीवने एकदा सुखं भवति, अन्यस्मिन् समये दुःखं भवति । सर्वदा न सुखं भवति न वा दुःखं एव भवति । अतः अस्मिन् विषये चिन्ता न करणीया।

"पूर्वं त्वयाप्यभिमतं गतमेवमासी-<br>च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः ।<br>कालक्रमेण जगतः परिवर्तमाना<br>चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ॥"

अथवा

सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः ।<br>सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम् ।।

-अर्थः सुखं दातुं भवेत्, प्राणाः सुखं दातुं (भवेयुः), तपः सुखं दातुं भवेत्। अन्यत् सर्वं सुखं दातुं भवेत्, (परम्) न्यासस्य रक्षणं दुःखं भवेत् ॥
अयमाशयः धनप्रणादीनां समस्तानां वस्तूनां वितरणं तावल्लोके सुकरं परं निक्षेपरक्षणं नामस्वस्मिन्नुत्तरदायित्वेन सर्वथादुष्करम्।

प्रश्न. 20 - 'गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते' इति सामान्यतः चम्पूकाव्यलक्षणं प्रथितमस्ति लक्षणग्रन्थेषु । चम्पयति योजयति गद्यपद्ये इति चम्पूः । अथवा चमत्कृत्य पुनाति सहृदयान् विस्मयीकृत्य प्रसादयतीति चम्पूः ।

अथवा

भोजराजेन अनेके शास्त्रग्रन्थाः नैकानि च काव्यानि विरचितानि सन्ति । तेष्वन्यतममिदं 'चम्पूरामायणम्'। अन्ये चैते सन्ति सरस्वतीकण्ठाभरणम्, शृङ्गारप्रकाशः (अलङ्कारशास्त्रीयः ग्रन्थः) शब्दानुशासनम् (भोजव्याकरणनामकः व्याकरणशास्त्रीयः ग्रन्थः), सङ्गीतप्रकाशः (सङ्गीतशास्त्रस्य ग्रन्थः), समराङ्गणसूत्रधारः (वास्तुशास्त्रीयम् पुस्तकम्), शिवदत्तस्तोत्रम्, राजमार्तण्डः (व्याख्यानम्), रघुवंशव्याख्यानम्, राजवार्तिकम् (व्याख्यानम्) चैतानि नैकानि भोजराजेन विरचितानि पुस्तकानि सन्ति।

प्रश्न. 21 -

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः<br>शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।<br>यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु<br>स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ 1 ॥

अथवा

एष भगवान् मणिराकाशमण्डलस्य चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोक-विमोकः, कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य । अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्। इति।

दीर्घोत्तरीय प्रश्नोत्तर

प्रश्न. 22 - निबन्धभेदाः - निबन्धाः प्रायः चतुर्धा भवन्ति । ते च विचारात्मकाः, आख्यानात्मकाः, वर्णनात्मकाः, गुणदोषविवेचनात्मकाश्चेति। इदं चात्र नित्यं हृदि करणीयं यत् - इदं वर्गीकरणं तावदेव उपयोगितां याति यावत् कथ्यस्य प्रतिपादनं तत्तद्विशेषतायुक्तं स्यात् । तत्तद्विशेषाणामङ्गानि कानिचिद् विशेषान्तरेष्वपि स्युर्नाम । तद्यथा आख्यानात्मके निबन्धेऽपि कदाचित् बहु वर्णनं स्यात् । ये च विचारात्मकाः निबन्धाः न भवन्ति, तेष्वपि सर्वत्र भूयान् अल्पीयान् वा विचारस्तु भवत्येव । तथापि निबन्धे स्वाभिप्रायस्य स्वरुच्यादेश्च लेखेन निबन्धनमेव भवति ।

अथवा

प्रायः यत्किञ्चित् विषयकः स्पष्टार्थसम्बन्धो गद्यबन्धः निबन्धः इति । वस्तुतः किञ्चिद्विषयमालम्ब्य स्वाभिप्रायस्य स्वविमर्शस्य च लेखेन निबन्धनं निबन्धः इति युज्यते वक्तुम् । परमात्रार्थे एवास्य शब्दस्य व्यवहारो न भवति, परन्तु लोकेऽन्यत्राप्यर्य शब्दः प्रयुज्यते । यत्र स्वाभिप्रायादिर्नास्ति, केवलं तन्त्रान्तरेभ्यः समाहृत्यैकवस्तुविषयोऽर्थः स्वशब्दैरुच्यते तत्रान्यत्र चेतिवृत्ताख्याने सर्ग सौन्दर्य-वर्णने चेतनाचेतनार्थानामाकारादिवर्णने चास्य शब्दस्य प्रयोगस्य दर्शनात् । निबन्धाः खलु परिशीलनमन्तरेण न शक्याः निबद्धुम् । अस्य निबन्धने बहुविधं प्रशिक्षणमावश्यकं भवति । एतत् सर्वमत्र सङ्ग्रहेणोपन्यस्यते -

- विषयैक्यम् - निबन्धे खलु एकमेव वर्ण्यविषयः प्रतिपाद्यविषयो वा स्यात् ।
- क्रमः - निबन्धबन्धने विचाराणां प्रस्तुतिक्रमः विशेषतः ध्यातव्यो भवति । सामान्यतः प्रथमं तावत् प्रस्तावना किं वा विषयावतारः, ततः विषयप्रतिपादनं ततश्चोपसंहारः इति प्रतिनिबन्धं क्रमो भवेत्।
- संक्षेपः - निबन्धः नातिदीर्घः स्यात् । अप्रस्तुतैः विषयैः विचारैर्वा अस्य कलेवरं न कदापि विवर्धयेत। प्रत्येकं निबन्धस्यापेक्षितो विस्तारः निबन्धरचयितुः मर्यादा भवेत् ।
- शैली- निबन्धस्य निबन्धने स्फुटार्थता, मधुरता, श्लक्ष्णता नैसर्गिकता च पदानां स्यात् ।

प्रश्न. 23 - अङ्गारन्यायः -

अङ्गारः उष्णः यदा भवति तदा हस्ते गृहीतः चेत् हस्तं दहति स एव यदा शीतलः भवति तदा स्पृष्टः चेत् हस्तं मलिनं करोति। एवं कस्याम् अपि दशायां तस्य स्पर्शः दोषजनकः एव। तथा एव दुर्जनस्य संगतिः अपि हानिम् एव करोति इति श्रोतयितुम् अस्य न्यायस्य प्रयोगः भवति।

अथवा

अतिपरिचयन्यायः - अतिपरिचयेन प्रेमापेक्षया अपमान एव भवति इत्यस्य न्यायस्य अर्थः। यथा- अत्यन्तं मूल्यवान् सुगन्धी चन्दनवृक्षः मलयपर्वते अधिकप्रमाणेन उपलभ्यते। अधिकप्रमाणेन लभ्यते इति कारणेन तत्रस्थाः भिल्लमहिलाः तस्य वृक्षस्य मूल्यम् अज्ञात्वा तम् इन्धनरूपेण विनियुञ्जते ।

"अतिपरिचयाद् अवज्ञा सन्ततगमनाद् अनादरो भवति।

मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते ॥" (शार्ङ्गधरपद्धतिः 83)

प्रश्न. 24 - नाटकस्य लक्षणम् - नाटकस्य कथावस्तु इतिहासप्रसिद्धं स्यात्। मुखप्रतिमुखादिभिः पञ्चसन्धिभिः युक्तं, विलास-सुख-दुःखादिप्रसङ्गयुक्तं नाटकं भवेत्। नाटके न्यूनातिन्यूनं पञ्च, अधिकाधिकं दश अङ्काः भवेयुः। नाटके प्रख्यातवंशे उत्पन्नः प्रतापी धीरोदात्तः नायकः भवेत्। नाटके मुख्यः रसः वीरः शृङ्गारः वा भवेत्, अन्ये रसाः गौणतया निरूपणीयाः। निर्वहणसन्धौ (अन्तभागे, समाप्त्यवसरे) अद्भुतः रसः भवेत्। नाटके कथावस्तु गोपुच्छवत् निरूपणीयम्। यथा अग्रे सूक्ष्मम्, मध्ये विस्तीर्णम्, उपसंहारे च सूक्ष्मम् इति। इत्थं नाटकस्य प्रधानलक्षणानि सन्ति। एतैः लक्षणैः युक्तं रूपकं नाटकम् उच्यते। पञ्चाङ्कं नाटकम् अवरं, सप्ताङ्कं मध्यम तथा दशाङ्कं नाटकं महानाटकम् उच्यते।

अथवा

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री।
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः।
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥

प्रश्न. 25 - याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ।। (1.6)

विमर्शः - अधिगुणे अर्थात् गुणवति जने कृता याच्ञा याचना, यदि मोघा अर्थात् निरर्थका भवति, तदापि सा वरम् अस्ति । गुणवति जने याचनाकरणं वरमस्तीत्यभिप्रायः । परन्तु अधमे जने कृता याचना यदि लब्धकामा स्यात् तदापि सा वरं नास्ति । अधमे गुणविहीने जने याच्ञाकरणं वरं नास्तीत्यभिप्रायः ।
गुणवान् जनः कदाचित् केनापि अकथनीयेन कारणेन याचनापूर्तिं कर्तुं समर्थो न भवति, तथापि तस्मिन् गुणवति जने एव याचना करणीया । यतोहि सः याचमानं जनं यत्र कुत्रापि प्रकाशितं न करोति । परन्तु यः खलु गुणहीनोऽधमः जनो भवति, सः यद्यपि याचनायाः पूर्तिं करोति, तथापि सः याचकस्य स्वमानं न परिरक्षति । याचनापूर्तिं कृत्वा स्वीयं महिमागानं कारयितुं सः याचमानं जनं यत्र कुत्रापि प्रकाशितं करोति । अतः अधमे लब्धकामा याच्ञा अपि वरं नास्तीति कविना निर्दिष्टमत्र ॥

अथवा

"तेजसा हि न वयः समीक्ष्यते" - समाजे केचन जनाः तेजस्विनः भवन्ति। एतेषां तेजस्विजनानां यत् किमपि वयः भवति, तेषां वयसः आधारेण तेजसः मूल्यं न करणीयं भवति। अतः कविः कथयति यत् तेजसां वयः न समीक्ष्यते। अल्पवयस्काः अपि तेजस्विनः सन्ति चेत् तेषां तेजसः सदा आदरः करणीयः ॥

प्रश्न. 26 - "अकुशलदर्शना अपि स्वप्नाः प्रशंसया कुशलपरिणामा भवन्ति ।"

विमर्शः - ये खलु शयनकाले अनुभूताः अकुशलदर्शनाः अर्थात् अशुभघटनायाः सूचकाः स्वप्नाः भवन्ति, तेऽपि प्रशंसया अर्थात् देवानां स्तुत्या कुशलपरिणामाः अर्थात् शुभस्य परिणामस्य दायकाः भवन्ति । यदा मानवः शेते तदा सः स्वप्नमपि पश्यति । स्वनाः अनेकप्रकारकाः भवन्ति । तेषु केचन शुभस्य परिणामस्य दायकाः भवन्ति, केचन अशुभस्य परिणामस्य दायकाः भवन्तीति स्वप्नज्ञानं मतमस्ति । अस्यां स्थितौ कविरत्र स्तुतिकरणेन कुशलपरिणामो भवति । अतः स्वप्ने अकुशलदर्शने सत्यपि देवप्रशंसयासः कुशलपरिणामः भवितुमर्हतीति सूचिमत्र ॥

अथवा

भवभूतेः कृतयः - भवभूतेः त्रीणि रूपकाणि प्रसिद्धानि सन्ति, महावीरचरितम् (नाटकम्), मालतीमाधवम् (प्रकरणम्), उत्तररामचरितम् (नाटकम्) इति । महावीरचरिते सप्त अङ्काः सन्ति । अस्मिन् रामस्य पूर्वचरितं वर्णितम् अस्ति । मालतीमाधवं प्रकरणम् अस्ति अतः अस्मिन् दश अङ्काः सन्ति । अस्य कथावस्तु कविकल्पितम् अस्ति । अत्र मालती नायिका, माधवश्च नायकः अस्ति । द्वयोः प्रेमकथा प्रधाना अस्ति अस्मिन् प्रकरणे । उत्तरामचरितं नाटकम् अस्ति । अस्मिन् सप्त अङ्काः सन्ति । इदं भवभूतेः श्रेष्ठं नाटकं वर्तते । रामस्य उत्तरचरितम् अत्र वर्णितम् अस्ति ।

भवभूतेः वैशिष्ट्यम् - भवभूतेः रीतिः गौडी, गुणः ओजः चास्ति । अस्य प्रियं छन्दः शिखरिणी अस्ति । उत्तररामचरिते मुख्यं रसं करुणं प्रयुज्य एषः नूतनं मार्ग निर्मितवान् । कालिदासः प्रकृतेः कोमलं स्वरूपं वर्णयति किन्तु भवभूतिः प्रकृतेः कठोरं स्वरूपं वर्णयति । भवभूतेः रामः मर्यादां परित्यज्य मुक्तमनसा रोदिति । इत्थम् अनेकरीत्या भवभूतिः संस्कृतनाट्यकारेषु विशिष्टः प्रतिभाति ।

प्रश्न. 27 - 'स्वप्नवासवदत्तम्' इत्याख्यनाटकस्य द्वितीयोऽङ्कः -
द्वितीयाङ्कस्य प्रारम्भे 'प्रवेशके' चेटी आगत्य पद्मावत्याः कन्दुकक्रीडनं सूचयति । तदनन्तरं पद्मावती वासवदत्ता च वार्तालापं कुर्वत्यौ प्रविशतः। तत्र चेटी श्रावयति यत् पद्मावत्या विवाहः उदययनेन सह निश्चितम्। तदैव वासवदत्तया मनसि विचारितम् यत् आर्यपुत्रः ममेदानीं परकीयः संवृत्तः। अथ च सा चिन्तातुराऽभवत्। द्वितीयाङ्कस्य उपान्ते चेटी भणति। "अद्य किल शोभनं नक्षत्रम् अद्यचैव कौतुकमङ्गलं कर्तव्यमित्यस्माकं भट्टिनी भणति।"
श्रुत्वैतत् वासवदत्ता मनसि चिन्तयति । "यथा यथा त्वरते तथा तथान्धीकरोति मे हृदयम्। अन्ते धात्र्या सह सर्वे निष्क्रान्ताः। इति ज्ञात्वा सहजा आवन्तिका विषण्णा भवति।

अथवा

भारतीयसंस्कृतेः स्वरूपम् -
सम्यक्कृतिः संस्कृतिः कथ्यते । या मनसः आत्मनो वा संस्कारं करोति सा संस्कृतिः । सम् इत्युपसर्गपूर्वकं कृधातोः 'स्त्रियां क्तिन्'प्रत्यये सति 'संस्कृतिः' इति शब्दः निष्पन्नी भवति । संस्करणं परिष्करणं चेतसः आत्मनो वा संस्कृतिः इति समभिधीयते । भारतीया संस्कृतिः विश्वस्य सर्वासु संस्कृतिषु प्राचीना श्रेष्ठा प्रेष्ठा च इति सर्वैः विद्वद्भिः स्वीक्रियते । संस्कृतिः मानव-अन्तःकरणस्य अज्ञानं दूरीकरोति, चित्तभ्रममपहरति, ज्ञानलोकं प्रकाशयति च । अतः यथा मानवस्य श्रेष्ठप्रवृत्तीनां सन्तुलनं भवति तथा आचारस्य पवित्रतायाः व्यवहाराणाम् उत्कृष्टतायाः च सम्यक् ज्ञानं भवति सा संस्कृतिः । अतः एवोक्तं मनुना –

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः । स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवः ॥ (मनुस्मृतिः)
भारतीयसंस्कृतेः महत्त्वम् -
संस्कृतेः विचारस्वातन्त्र्यं सदाचारपालनं धर्मप्राधान्यं, दुर्भावदमनं पापस्य अपाकरणं, दुःखदहनं ज्ञानज्योतिप्रदानं, अविद्यातमोपहरणं, सुखसाधनं, सत्यस्थापनम् असत्यप्रशमनं, शान्तिप्रदानं विश्वबन्धुत्वस्थापनं मनोऽमलीकरणम् इत्यादयः दुर्लभाः गुणाः विराजन्ते । सर्वेषां धर्माणां सम्प्रदायानाम् आचाराणां च परस्परं समन्वयः संस्कृतेः एव आधारेण कर्तुं शक्यते ।
जीवनस्य आर्थिक-सामाजिक-राजनैतिक-कला-शिक्षा-धर्मादिषु उन्नतिकारकः चेतः संशुद्धिकारकश्च चिन्तनव्यापारः संस्कृतिः वर्तते । साहित्यं संस्कृतिः वाहकमस्ति । एषा संस्कृतिः न केवलं भारतदेशस्य अपि तु समग्रविश्वस्य मुकुटायमानास्ति ।

• संस्कृतेः मूलं संस्कृतम् -
संस्कृतं भारतीयसंस्कृतेः आत्मा । संस्कृतभाषायाः माध्यमेन भारतीय-संस्कृतिः सुप्रतिष्ठिता अस्ति । बालकस्य जननादारभ्य क्रियमाणाः जातकर्म-नामकरण-अन्नप्राशनादिषोडशसंस्काराः अन्या एव भाषया विधीयन्ते । पूजापाठः, यज्ञयागादिक्रियाश्च अस्यां भाषायामेव प्रचलन्ति । संस्करणं परिष्करणं च एतत् आत्मनो संस्कृतिः इत्यभिधीयते । अस्माकं देशस्य विशिष्टपुरुषाणां विचाराः वेशभूषाः कार्याणि आचाराः, यथा तिलकधारणम्, शिखासंस्थापनम्, अस्माकं संस्कृतौ अन्तर्भवन्ति । भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा । संस्कृतिः संस्कृताश्रया, यथा उक्तं कपिलेन -

संस्कृतं संस्कृतेर्मूलं ज्ञान-विज्ञानवारिधः । वेदतत्त्वार्थसंजुष्टं लोकालोककरं शिवम् ॥
अतः वक्तुं शक्यते यत् संस्कृतिः संस्कृतम् अनयोर्मध्ये घनिष्ठतरः सम्बन्धः अस्ति । संस्कृतेः संरक्षणाय संस्कृतभाषा अनिवार्या । अस्माकं सभ्यता-संस्कृतिश्च संस्कृतग्रन्थेष्वेव दरीदृश्यते । संस्कृतेन सह संस्कृतेः सम्बन्धः यदि विच्छिन्नः भवति, तर्हि भारतीयसंस्कृतेः संरक्षणं न भवत्येव । अत एवोक्तम् -

संस्कृतेन सुसम्पन्नं भारतं भारतमुच्यते । संस्कृतेन विना देशः केवलं चेण्डियोच्यते ॥ (कपिलस्य)

भारतीयसंस्कृतेः वैशिष्ट्यम् -
भारतीया संस्कृतिः केवलं प्राचीनत्वादेव न प्रत्युत स्वगुणग्रामात् सर्वैः समादरिता सेवनीया वर्तते । तस्याः कतिपयानि वैशिष्ट्यानि अत्र प्रस्तूयते -

(क) धर्मप्राधान्यात्मकसंस्कृतिः
भारतीयसंस्कृतौ धर्मस्य प्राधान्यम् अस्ति । 'धारणाद्धर्मः' इत्याहुः धर्मो धारयते प्रजाः । धर्म एव पशुभ्यो मानवेभ्यःभिन्नं करोति । यथोक्तम् - धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः । वैशेषिकदर्शनकृता कणादेन भणितम् - यतोऽभ्युदयनिःश्रेयससिद्भिः स धर्मः । मनुना धृत्यादयो दश गुणाः धर्मनाम्ना मनुस्मृतौ व्याख्याताः -

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥ (मनुस्मृतिः ६/९२)
जगद्धारकाणि मूलतत्त्वानि यमाख्यया व्याख्यातानि शास्त्रेषु धर्मपदवाच्यानि तदेवोच्यतेत्र -

धारणाद्धर्म इत्याहुर्धर्मो धारयते प्रजाः । यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः ॥
यमस्तु व्याख्याता योगदर्शने - अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः (योग. २/३०) अर्थात् अहिंसायाः समाश्रयम्, सत्यस्य पालनम्, अस्तेयवृत्त्या आश्रयः, ब्रह्मचर्यव्रतस्य अनुष्ठानम्, अपरिग्रहव्रतस्य पालनं च यम इत्युच्यते । जीवनस्य सर्वेषु क्षेत्रेषु धर्मस्य प्राधान्यं स्वीकरोति । अस्माद् कारणाद् एव आशावादस्य अपि प्रबलता वर्तते ।

(ख) आध्यात्मिकी भावनात्मकसंस्कृतिः
आध्यात्मिकी भावना मानवं दैवत्वं प्रापयति । स सर्वेषु अपि जीवनेषु एकत्वं समीक्षते । 'ब्रह्म सत्यं जगन्मिथ्या' इत्यनेन भौतिकस्य जगतः अनित्यत्वं प्रतिपादितम् । यथोक्तम् - ईशावास्यमिदं सर्वं

यत्किञ्चजगत्यां जगत् । सर्वे प्राणिनः ब्रह्मणः स्वरूपम् । आध्यात्मभावना इति ईश्वरसत्ताङ्गीकारः एव आस्तिक्यं तदेव अस्याः संस्कृतेः आधारम् इति तत्त्वेन स्वीकृतं प्रतिभाति । यदिदं चराचरं जगत् वर्तते तत्सर्वम् ईश्वरकर्तृकम् ईश्वरेणैव निर्मितं मानवानां कल्याणकामनया । तथा च श्रूयते -

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥ (ईशा १)
यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ (ईशा ६)
यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विभाजतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ (ईशा ७)

प्रत्येकं गृहस्थाय वानप्रस्थाश्रमे प्रवेशार्थं त्यागोऽनिवार्यो विद्यते । कस्यचिद् अन्यस्य धनं स्वत्वं प्रति गृधीः मा कार्षीः - तदत्र संसारस्वरूपावबोधाय मानवकर्तव्यकर्मपरिचयनाय एष निर्देशः सर्वप्राथम्येन कृतः । अध्यात्मप्रवृत्त्या जीवनम् उन्नतं भवति । स प्रतिपदम् आनन्दम् अनुभवति । अध्यात्मप्रवृत्त्या मनसि सहृदयता सहानुभूतिः औदार्यादिकं च प्रवर्तते ।

प्रश्न. 28 - कविपरिचयः - महाकविः भारविः -
भारवेः जन्मनाम दामोदरः । एतस्य पिता नारायणस्वामी । दामोदरः चालुक्यराजस्य विष्णुवर्धनस्य मित्रम् आसीत्। कौशिकगोत्रोत्पन्नस्य भारवेः पूर्वजाः पूरा उत्तरपश्चिमभारतान्तर्गतमानन्दपुरं नाम नगरमध्यवात्सुः परतश्च ते नासिकनामकं दक्षिणभारतनगरमायाताः ।
अवन्तिसुन्दरीकथायामस्य कवेः विषये एका कथोल्लिखितास्ति । एकदा स्वसमकालिकेन राजकुमारेण विष्णुवर्धनेन समं मृगयायां घोरं काननमुपेतो भारविः मांसं सिषेवे, तत्पापापनोदनाय स तीर्थानि बभ्राम । तदीयं काव्यं श्रुत्वा काञ्चीनृपः सिंहविष्णुस्तमात्मराजधानीमानाययत् । सिंहविष्णुतनयेन राजकुमार-महेन्द्र विक्रमेण स तत्र सानन्दमुवास । तस्य पुत्रो मनोरथनामाऽसीत् । तस्य प्रपौत्रः दण्डी बभूव ।
एवं मन्यते यदयं कविः ख्रिस्तस्य षष्ठे शतके सञ्जातः। भारविरिति नाम ऐहोलः शिलालेखे निम्नलिखितरूपेण प्राप्यते-

येनायोजि नवेऽश्मस्थिरमर्थविधौ बिवेकिना जिनवेश्म ।
स विजयतां रविकीर्तिः कविताश्रितकालिदासभारबिकीर्तिः ॥

अयं पुलकेशिनो द्वितीयस्य 634 ई. सामयिकः शिलालेखः, अतो भारविस्तत्पूर्वतनः सम्भवति ।
कतिपये पण्डितास्तु बाणेन हर्षचरिते स्वपूर्वबर्तिकविप्रसङ्गे भारविः नैव स्मृतोऽस्तीति हेतुना तेन बाणपरवर्तिना भाव्यमित्यपि निर्दिशन्ति ।
न केवलं स्थितिकालस्यापि तु कवेरस्य देशविषयेऽपि तथैवान्धकारो विद्यते । राजशेखरानुसारेणाऽसौ विशालायां परीक्षित आसीत् किन्तु नैतावताऽस्य देशो निर्णेतुं शक्यते । अधिकांशतः पण्डिता अमुं दाक्षिणात्यं मन्यन्ते, किन्तु अस्य शरदधिमालययोर्वर्णनं तु कविममुमौत्तरीयमेव सूचयति । अस्य हि सह्याद्रिप्रसंगमालोक्य केचित्तं महाराष्ट्रीयं मन्यन्तेऽन्ये तु तद्वाग्युक्तिमेव मन्यन्ते ।
भारवेरर्थगौरवं प्रसिद्धम् । अत एव मल्लिनाथोऽपि टीकायाः प्रारम्भे नारिकेलफलसम्मितं वचो भारवेरित्याह।

बहोरप्यर्थराशेरल्पेन शब्देनाभिधाने भारविरभ्यस्तकौशल इति सर्वेषां विदुषां विचारः। 'हितं मनोहारि च दुर्लभं वचः' 'सहसा विदधीत न क्रियाम्' इत्यादयः तस्य प्रयोगाः एतमभिप्रायं समर्थयन्ति । 'भारवेः अर्थगौरवम्' इत्युक्तिरपि विमर्शकलोके प्रसिद्धा। एकमेव महाकाव्यं लिखित्वा अपि भारविः स्वकवित्वेन, पाण्डित्येन, वर्णनकौशलेन च कविप्रपञ्चे विशिष्टं स्थानं प्राप्तवान्।

अथवा

महाकविभासः - जीवनवृत्तं कृतित्वञ्च -

महाकविभासस्य जीवनचरितसन्दर्भे न कमपि स्पष्टं विवरणं सम्प्राप्यते। महाकविकालिदासः मालविकाग्निमित्रस्य प्रस्तावनायां (प्रथितयशसां भाससौमिल्ल) इतिभासं सादरं स्मरति। अनेन सिद्धयति यदयं कलिदासात् पूर्वमेव नाटककारेषु सुविख्यातः आसीत्। भासस्य नाटकेषु तज्जीवनचरितस्य किमपि स्पष्टं विवरणं न प्राप्यते तथापि, भासः उच्चश्रेण्याः विद्वान् आसीत्। तेन वेदाः, शास्त्राणि, स्मृतयः, काव्यशास्त्राणि, नाट्यशास्त्राणि, दर्शनानि, पुराणानि गंभीरतया अधीतानि। स नाट्यकलायाः ज्ञाता आसीत्, कालिदासेन श्रेष्ठनाटकारत्वेन तस्मै मान्यता प्रदत्ता।

भासस्य नाट्यकृतित्वम् महाकविभासस्य कृतित्वेन साम्प्रतं त्रयोदश (13) नाटकानि समुपलभ्यन्ते। खीताब्दस्य 1909 ईसवीये श्री टी. गणपति शास्त्री महोदयेन त्रावणकोरराज्यात् एतानि नाटकानि प्राप्तानि।

भासनाटकानि कथास्रोतदृष्टया चतुर्धा विभक्तुं शक्यते।

(क) उदयन कथा मूलकम्

(1) प्रतिज्ञायौगन्धरायणम् (2) स्वप्नवासवदत्तम्।

(ख) महाभारत मूलकम्

(3) उरूभङ्गम् (4) दूतवाक्यम् (5) पञ्चरात्रम् (6) बालचरितम् (7) दूतघटोत्कचम् (8) कर्णभारम् (9) मध्यमव्यायोगः।

(ग) रामायणमूलकम्

(10) प्रतिमानाटकम् (11) अभिषेकनाटकम्

(घ) कल्पनामूलकम्

(12) अविमारकम् (13) चारुदत्तम्।

भासस्य नाट्यकला - समुपलब्धं संस्कृतवाङ्मयमनुशील्यते चेत् प्राप्यते यत् भास एव नाटककारेषु श्रेष्ठः अग्रणीरिति। नाटकानां बाहुल्येन, विषयवैविध्येन च नाट्यकौशलं वैशद्यं च दृश्यते। नाटकेषु तस्य प्रमुख विशेषताः सन्ति भाषासारल्यं, कृत्रिमता रहिता, शैली, वर्णनेषु यथार्थता, घटनासंयोजनसौष्ठवं, कथा प्रसङ्गस्य सरलः प्रवाहः, मौलिकता, कल्पनावैचित्र्यञ्च प्राप्यते।

भाषाशैली : भासस्य शैल्यां माधुर्योजः प्रसादानां त्रयाणां गुणानां समाहारः दृश्यते। भाषा सरला, सुबोधा, सरसा, स्वाभाविकी, सप्रवाहा च । भासः मानवीय मनोवृत्तीनां वर्णने सफलः ।

तद्यथा दुःखं त्युक्तुं बद्धमूलोऽनुरागः स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषामद् विमुच्येह बाष्पं प्राप्तानृण्या याति बुद्धिः प्रसादम्।। (स्वप्नवास. 4.6)

भासः भारतीयभावानां कविः । तस्य नाटकेषु भावानामुचितं समन्वयः प्राप्यते। यथा पितृभक्तिः, पतिव्रत्यम्, भ्रातृप्रेम, क्षमाशीलता, त्यागादिकञ्च। पातिव्रत्यं वर्ण्यते यथा-

अनुचरति शशाङ्के राहुदोषेऽपि तारा,
पतति न वनवृक्षे याति भूमिं लता च।
त्यजति न च करेणुः पङ्कलग्नं गजेन्द्र
व्रजतु चरतु धर्मं भर्तुनाथा हि नार्यः ।। (प्रतिमा 1.25)

भासस्य नाटकानां लोकप्रियतायाः कारणं वर्तते सरसता, सरलता, रम्यता च ।